संस्कृतवार्ता:
13.07.2024
सायम् - 06:20

## मुख्यवार्ता:

· सप्तदश राज्यानां त्रयोदशविधानसभासनेषु कांग्रेस-तृणमूल कांग्रेस दलाभ्यां चत्वारि आसनानि भाजपा दलेन द्वे आसने आम आदमी, डीएमके प्रत्येकं दलाभ्यां च एकम् आसनं विजितम्।

· केन्द्रीय-गृहमन्त्रिणा अमितशाहेन उक्तं यत् प्रशासनं देशस्य सीमवर्ति-ग्रामाणां सर्वांगीण विकासाय प्रतिबद्धम् अस्ति।

· ऐषम: वित्तवर्षे आयकर-संग्रहणे नवदश प्रतिशत् मिता वृद्धि: संजाता। आयकर-विभागेन वर्तमान-वित्त-वर्षाय प्रत्यक्ष-कर-रूपेण पञ्च-चत्वारिंशसत्-सहस्राधिक-षड्-लक्ष-कोटि-रूप्यकाणि एकत्रितानि।

· मुख्यन्यायाधीश: डी०वाई० चन्द्रचूड़ अवोचत् यत् विधे: अध्ययनं क्षेत्रीय भाषासु भवेत् इति।

· लदन नगरे विंबलडन-टेनिस-प्रतियोगिताया: महिला-एकल-अन्तिम चक्रे अद्य सायंकाले जैस्मीन-पाओलिनी-इत्यस्य स्पर्धा बारबोरा -क्रेजिकोवया सह भविष्यति।

## विधानसभानिर्वानम्

सप्तराज्यानां त्रयोदश विधानसभासनानाम् उपनिर्वाचनस्य परिणाम: उद्घोषित:। इदानीं यावत् एकादश आसनानां परिणाम: आगत:। कांग्रेस दलेन चत्वारि आसनानि तृणमूल कांग्रेस दलेन त्रीणि आसनानी च विजितानी पञ्जाबे आम आदमी पार्टीतिदलेन जालन्धर-पश्चिम विधानसभासने विजयोधिगत:। हिमाचलप्रदेशे कांग्रेसदले द्वे आसने भाजपादलेन च एकम् आसनं विजितम्। पश्चिम बङ्गाले तृणमूल कांग्रेसदलेन त्रिणि आसनानि विजितानि। अन्येषु राज्येषु अपि परिणामोद्घोषणा अद्यैव विधीयते।

## गृहमंत्री

केन्द्रीय-गृहमन्त्रिणा अमितशाहेन अद्य राजधान्यां नवदिल्ल्यं वाइब्रेंट विलेज कार्यक्रमस्य कार्यान्वियनस्य समीक्षायै उच्चस्तरीयोपवेशनस्य अध्यक्षता कृता। अत्रावसरे गृहमन्त्री अवोचत् यत्। प्रधानमन्त्रिण: नरेन्द्रमोदिन: नेतृत्वे प्रशासनं देशस्य सीमवर्ति-ग्रामाणां सर्वांगीण विकासाय प्रतिबद्धम् अस्ति। अमुना स्थानीय-निवासिभ्य: वृते अवसरप्रदानं सीमवर्ति-ग्रामेभ्य: पलायनं वारयितुं च सहभागिता-संवर्धनं सबलं प्रति पादितम्। गृहमन्त्रिणा उक्तं यत् सीमवर्ति ग्रामान् निकसा नियुक्तै: केन्द्रीय-सशस्त्र आरक्षिबलेन सैन्य बलेन च सहकारि-समितिनां साहाय्येन स्थानीय कृषि-हस्तशिल्पोत्पादानां च क्रयं विधाय तेभ्य: प्रोत्साहनं प्रदातव्यम्, अपि च उक्तं यत् स्थानीय-निवासिभ्य: अपि सैन्य बलेभ्य: विद्यामानानां स्वास्थ्य वैविध्यानां च लाभ: प्राप्तव्य:। अस्मिन् उपवेशने केन्द्रीयगृह-सचिव: अजय भल्ला मन्त्रालयस्य अन्ये अधिकारिणश्च उपस्थित: आसन्। अवधेयं यत् वाइब्रेंट विलेज कार्यक्रमस्य अन्तर्गतं अरुणाचल-हिमाचल-सिक्किम-लद्दाख-उत्तराखण्ड-राज्यानां नवदश जनपदानां षड्चत्वारिंशत् प्रखण्डानां चयनित ग्रामणां व्यापक विकासाय केन्द्र प्रायोजिता योजना विद्यते।

## सर्वोच्च न्यायालय

सर्वोच्च-न्यायालयस्य प्रधान-न्यायाधीशः डी.वाई. चंद्रचूडः अवोचत् यत् यदि विधेः सिद्धान्ताः सामान्य-जनेभ्यः सरल-शब्देषु नैवोपलभ्यन्ते तर्हि विधेः कार्य-क्षेत्रे विधिशिक्षायां च नैयून्यं वर्तते। असौ अद्य लखनऊ-नगरे डॉ. राम मनोहर लोहिया राष्ट्रीय विधि-विश्वविद्यालयस्य दीक्षान्त-समारोहं सम्बोधयति स्म। अत्रावसरे मुख्य-न्यायाधीशेन क्षेत्रीयभाषाषु विधेः शिक्षा-प्रदानस्य आवश्यकता सबलं प्रतिपादिता।

## आयकर-विभागेन

आयकर-विभागेन वर्तमान-वित्त-वर्षाय प्रत्यक्ष-कर-रूपेण पञ्च-चत्वारिंशत्-सहस्राधिक-षड्-लक्ष-कोटि-रूप्यकाणि एकत्रितानि। ऐषम: वित्तवर्षे आयकर-संग्रहणे नवदश प्रतिशन् मिता वृद्धि: संजाता। अस्य मासस्य एकादश दिनाङ्कं यावत् द्वयोत्तर-नवशताधिक-सप्तति-सहस्र-कोटिरूप्याकाणि च आयकर-दातृभ्यः प्रत्यावर्तितानि। अवधेयं यत् असस्य मासस्य एकत्रिंशत् दिनाङ्कः आयकर-प्रदानाय अन्तिमोवधिः वर्तते।

## प्रधानमन्त्री – मुम्बईनगरी

प्रधानमन्त्री नरेन्द्रमोदी अद्य मुम्बय्या: गोरेगांवक्षेत्रस्य इंजीनीयरिंग-सर्विस-कम्पनी इत्यस्मिन् प्रदर्शनीकेन्द्रे चतुश्शतकोट्यधिक-नवविंशतिसहस्ररूप्यकाणां मार्ग-रेल-जलपोतस्थानक-परियोजना: राष्ट्राय समर्पयिष्यति आधारशिलां च स्थापयिष्यति। सायं च श्रीमोदी भारतीयसमाचारसेवासचिवालये आई. एन्. एस्. इत्यस्य स्तम्भस्यापि उद्घाटनं विधास्यति।

## स्वास्थ्यमन्त्री

स्वास्थ्यमन्त्री जगत-प्रकाश-नड्डा अवोचत् यच् आयुष्मान-भारत प्रधानमन्त्री जन- आरोग्य-योजना अथ च आयुष्मान-भारत-डिजिटल-मिशन-योजनाः इच्छितान् उद्देश्यान सफलतापूर्वकं पूरयन्ति। गतदिने नव-दिल्ल्यां राष्ट्रिय-स्वास्थ्य-प्राधिकरणस्य वरिष्ठाधिकारिभिः सह स्वास्थ्यमन्त्रिणा एतासां योजनानां समीक्षा कृता। एकस्मिन् सामाजिक-सञ्चारपटले स्वास्थ्यमन्त्रिणा उक्तं यत् इदानीं यावत् चतुस्त्रिंशत् कोट्यधिकानि आयुष्मान-पत्राणि जनेभ्यः प्रदत्तानि एतेषु सप्तकोट्यधिक-पत्राणां माध्यमेन चिकित्सालयेषु प्रवेशस्य सौविध्यं प्रदत्तम्।

## वेव्स शिखर सम्मेलनं

अस्मिन् वर्षे भारतदेश: नवम्बरमासस्य विंशति: दिनांकत: चतुर्विंशति: दिनांकं यावत् गोवा-राज्ये प्रथम-विश्व-दृश्य-श्रव्य-मनोरंजन-शिखर-सम्मेलन-वेव्स-इत्यस्य आयोजनं करिष्यति। अद्य नवदिल्ल्यां गोवाराज्यस्य मुख्यमंत्री प्रमोद-सावंत: अवदीत् यत् भारतदेश: विश्वस्य बृहत् चलचित्र-निर्मातृ-देशानां श्रेण्यां वर्तते। तेन एतदपि प्रोक्तम् यत् वेव्स-इति-सम्मेलनं भारतस्य वार्ताभिकरणार्थं मनोरंजन-उद्योगस्य उज्ज्वल-भविष्यर्थं च महत्वपूर्णं वर्तते। कार्यक्रमं सम्बोधयन् सूचना-प्रसारण-मंत्री-अश्विनीवैष्णव: अवादीत् यत् वेव्स-इति-सम्मेलनं भारतस्य मनोरंजन-उद्योगस्य विकासाय महत्वपूर्णं भविष्यति।

## कारगिल विजय दिवस:

भारतीयसेनया लद्दाखे कारगिल-विजय-दिवसस्य रजयजयन्त्या: पूर्वं कारगिल-हैलिपैड इति उदग्रयान-निलये **'स्वीयं सैन्यबलं ज्ञा स्यन्तु** इति नाम्ना" अस्त्रोपकरणानां प्रदर्शनी आयोजिता। अत्रावसरे सैन्यबलानाम् अधिकारिण:। विद्यालयानां महा विद्यालयानां एन.सी.सी. प्रति भागिन: अन्ये जनाश्च उपस्थिता: अभवन्।

## इण्डोनेशिया दुर्घटना

इण्डोनेशियायां जावानगरे अद्य प्रातः दुरापादितायां बसयान-दुर्घटनायां षड् जनाः मृत्युमुपगताः। चतुर्जशजनाश्च व्रणिताः। स्थानीय-वार्ताभिकरणेन उक्तं यत् चालकाय निद्राकारणेन दुर्घटना अभवत्। दुर्घटना समये बसयाने द्वविंशति: यात्रिण: आसन्।

## ऋतु-सञ्चेतना

ऋतुविज्ञान-विभागेन आगामि पञ्च-दिनेषु गोवा-मध्य-महाराष्ट्र-गुजरात-केरल-दक्षिणान्तरिक-कर्नाटक च मूसलाधार वृष्टे अनुमानं प्रकटितम्। आगामि दिनचतुष्टये च तेलंगाना-मध्यप्रदेश-विदर्भ-छत्तीसगढेषु च प्रबल वर्षा-भवितुं शक्यते। सममेव ऋतुविज्ञान कार्यालयेन तटीयान्ध्र प्रदेशे पूर्वीय-उत्तरप्रदेशे च प्रचण्ड वर्षाया: भविष्यवाणी कृतास्ति।

## त्रिशूली नदी

नेपाले त्रिशूलनद्यां तरणरक्षकै: सैन्यबलानां आरक्षिबलानां च ढलेन दुर्घटना स्थले द्वितीय दिवसेऽपि अन्वीक्षणा-भियानं कृतम्। अत्र षष्टि: यात्रिणां बसयानद्वयं त्रिशूलीनद्यां निपतितौ। लुप्तजनानां परिवारजना: प्रभावी-उपकरणानां माध्यमेन अन्वीक्षणाभियानस्य अभियाचना कृतवन्त:। गतदिने सिमलताले भूस्खलन-कारणात् बसयानद्वयं त्रिशूलीनद्यां निपतितौ। एकं बसयानम् काठमांडूत: गौरस्थलं प्रति गच्छति स्म द्वितीय बसयानं बीरगंजत: काठमांडूनगरं गच्छति स्म।

## विम्बलडन

लंदन नगरे विंबलडन-टेनिस-प्रतियोगिताया: महिला-एकल-अन्तिम चक्रे अद्य सायंकाले जैस्मीन-पाओलिनी-इत्यस्य स्पर्धा बारबोरा -क्रेजिकोवया सह भविष्यति।

## क्रिकेट्

भारत-जिम्बाब्वे-दलयोः मध्ये अनुवर्तमानायाः विंशति-प्रतिविंशतिः क्रिकेट-शृङ्खलायाः चतुर्थ-स्पर्धा अद्य हरारे नगरे प्रवर्तते। पणकं विजित्य भारतेन प्रथमं कन्दुक-क्षेपणस्य निर्णयो विहितः। निर्धारितेषु विंशतिः क्षेपचक्रेषु जिम्बाब्वे दलेन सप्त क्रीडकाणां हानौ द्विपांचाशत उत्तर एकशतं धावनाङ्कानां विजय-लक्ष्यम् उपस्थापितम्। शृङ्खलायाः अन्तिमा स्पर्धा श्वो भविष्यति।

।। इति वार्ता: ।।